**Sri Medha Suuktam**

oṃ yaśchaṃda'sāmṛṣabho viśvarū'paḥ | chaṃdobhyo'dhyamṛtā''thsaṃbabhūva' |
sa meṃdro' medhayā'' spṛṇotu |
amṛta'sya devadhāra'ṇo bhūyāsam | śarī'raṃ me vica'rṣaṇam |
jihvā me madhu'mattamā | karṇā''bhyāṃ bhūriviśru'vam |
brahma'ṇaḥ kośo''si medhayā pi'hitaḥ |
śrutaṃ me' gopāya ||

oṃ śāṃtiḥ śāṃtiḥ śāṃtiḥ' ||

oṃ medhādevī juṣamā'ṇā na āgā''dviśvācī' bhadrā su'manasya mā'nā |
tvayā juṣṭā' nudamā'nā duruktā''n bṛhadva'dema vidathe' suvīrā''ḥ |
tvayā juṣṭa' ṛṣirbha'vati devi tvayā brahmā'''gataśrī'ruta tvayā'' |
tvayā juṣṭa'ścitraṃ vi'ṃdate vasu sā no' juṣasva dravi'ṇo na medhe ||

medhāṃ ma iṃdro' dadātu medhāṃ devī sara'svatī |
medhāṃ me' aśvinā'vubhā-vādha'ttāṃ puṣka'rasrajā |
apsarāsu' ca yā medhā gaṃ'dharveṣu' ca yanmanaḥ' |
daivīṃ'' medhā sara'svatī sā māṃ'' medhā surabhi'rjuṣatāg svāhā'' ||

āmāṃ'' medhā surabhi'rviśvarū'pā hira'ṇyavarṇā jaga'tī jagamyā |
ūrja'svatī paya'sā pinva'mānā sā māṃ'' medhā supratī'kā juṣaṃtām ||

mayi' medhāṃ mayi' prajāṃ mayyagnistejo' dadhātu mayi' medhāṃ mayi' prajāṃ mayīṃdra' iṃdriyaṃ da'dhātu mayi' medhāṃ mayi' prajāṃ mayi sūryo bhrājo' dadhātu ||

oṃ haṃsa haṃsāya' vidmahe' paramahaṃsāya' dhīmahi |
tanno' haṃsaḥ pracodayā''t ||

oṃ śāṃtiḥ śāṃtiḥ śāṃtiḥ' ||

ॐ यश्छंद'सामृषभो विश्वरू'पः । छंदोभ्योऽध्यमृता''थ्संबभूव' ।
स मेंद्रो' मेधया'' स्पृणोतु ।
अमृत'स्य देवधार'णो भूयासम् । शरी'रं मे विच'र्षणम् ।
जिह्वा मे मधु'मत्तमा । कर्णा''भ्यां भूरिविश्रु'वम् ।
ब्रह्म'णः कोशो'ऽसि मेधया पि'हितः ।
श्रुतं मे' गोपाय ॥

ॐ शांतिः शांतिः शांतिः' ||

ॐ मेधादेवी जुषमा'णा न आगा''द्विश्वाची' भद्रा सु'मनस्य मा'ना ।
त्वया जुष्टा' नुदमा'ना दुरुक्ता''न् बृहद्व'देम विदथे' सुवीरा''ः ।
त्वया जुष्ट' ऋषिर्भ'वति देवि त्वया ब्रह्मा'ऽऽगतश्री'रुत त्वया'' ।
त्वया जुष्ट'श्चित्रं वि'ंदते वसु सा नो' जुषस्व द्रवि'णो न मेधे ॥

मेधां म इंद्रो' ददातु मेधां देवी सर'स्वती ।
मेधां मे' अश्विना'वुभा-वाध'त्तां पुष्क'रस्रजा ।
अप्सरासु' च या मेधा गं'धर्वेषु' च यन्मनः' ।
दैवीं'' मेधा सर'स्वती सा मां'' मेधा सुरभि'र्जुषताग् स्वाहा'' ॥

आमां'' मेधा सुरभि'र्विश्वरू'पा हिर'ण्यवर्णा जग'ती जगम्या ।
ऊर्ज'स्वती पय'सा पिन्व'माना सा मां'' मेधा सुप्रती'का जुषंताम् ॥

मयि' मेधां मयि' प्रजां मय्यग्निस्तेजो' दधातु मयि' मेधां मयि' प्रजां मयींद्र' इंद्रियं द'धातु मयि' मेधां मयि' प्रजां मयि सूर्यो भ्राजो' दधातु ॥

ॐ हंस हंसाय' विद्महे' परमहंसाय' धीमहि ।
तन्नो' हंसः प्रचोदया''त् ॥

ॐ शांतिः शांतिः शांतिः' ॥